शब्दार्णव *An International Peer Reviewed Refereed Journal of Multidisciplinary Research*
वर्ष–11, अंक–21, भाग–4, जनवरी–जून, 2025 I **ISSN: 2395-5104 I** ***Impact Factor : 7.705***

# श्रीमद्भगवद्गीतायां पुराणसाहित्ये च प्रतिपादित: सांख्यतत्वविचारः - एक: विमर्शः

**फाल्गुनीमण्डलः* व डॉ. रणजित कुमार तिवारी****
*शोधछात्रा, सर्वदर्शनविभागः, कुमारभास्करवर्मसंस्कृतपुरातनाध्यनविश्वविद्यालयः, नमाटि, नलवारी, असमप्रदेशः
**सहाचार्यः, विभागाध्यक्षः, सर्वदर्शनविभागः, कुमारभास्करवर्मसंस्कृतपुरातनाध्यनविश्वविद्यालयः, नमाटि, नलवारी, असमप्रदेशः

**सारांश:** - भारतीयज्ञानपरम्परायां भारतीयदर्शनशास्त्रेषु सांख्यदर्शनं जगति प्राचीनतमदर्शनरूपेण सुप्रसिद्धमस्ति। सांख्यदर्शनस्य प्राचीनत्वविषये नास्ति कोऽपि संशयः। भारतीयज्ञान-विज्ञान-संस्कृति-सभ्यतायाः आधारभूतमस्ति सांख्यदर्शनम्। प्राय: सर्वेषां दर्शनशास्त्राणां तत्वनिरूपणे दर्शनस्यास्य उपयोग: दृश्यते । अस्य दर्शनस्य महत्वं केवलं दर्शनस्यास्य प्राचीनत्वेन न गृह्यते, अपि तु व्यापकतया वास्तवादिकतया च अस्य दर्शनस्य माहात्म्यं उपस्थाप्यते। श्रुतौ, स्मृतौ, महाभारते, श्रीमद्भगवद्गीतायां, पुराणसाहित्ये च सांख्यसिद्धान्तानां विचाराणां प्रतिपादनं दर्शनस्य प्राचीनत्वं सिद्ध्यति। तत्र सांख्यतत्वस्य सुष्पष्ट: मनोरम: विचार: प्राप्यते। वस्तुतः सांख्यसिद्धान्तानां प्रतिविम्वस्वरुपमस्ति पुराणसाहित्यम्। प्रायः सर्वेषु पुराणेषु सांख्यतत्वं विशिष्टं स्थानं लब्ध्वा एतेषां शास्त्राणां सौन्दर्यं वर्धयति। तन्मध्ये श्रीमदभागवतमहापुराणं सांख्यतत्वनिरूपणे मञ्जुषास्वरूपं वर्तते। तत्र सांख्यशास्त्रस्य सुस्पष्ट: मनोरम: विचारः उपलभ्यते। भगवतः पद्मनाभश्रीकृष्णस्य मुखनिःसृत: अमृत: तुल्य श्रीमद्भगवतगीतायां प्रतिपादितौ दार्शनिकपृष्ठभूमौ सांख्यशास्त्रस्य प्रभावः पर्याप्तरूपेण विद्यमानमासीत् एतद् परिदृश्यते। श्रीमद्भगवद्गीतायां भगवता श्रीकृष्णेन अजुनं प्रति उपदेशप्रदानकाले सांख्यसम्मततत्वविषये, गुणत्रयस्वरूपविषये, सत्कार्यवादसिद्धान्तविषये च स्वाभिमतं अभिव्यक्तं क्रियते। मया अस्मिन् लघुशोधप्रबन्धे पुराणसाहित्ये श्रीमद्भागवद्गीतायां च प्रतिपादितं सांख्यसिद्धान्तं उपस्थापितम् ।

**कूटशब्द: :-** पुराणसाहित्यम्, सांख्यशास्त्रम्, श्रीमद्भगवद्गीता, सांख्यसिद्धान्तम्, दर्शनशास्त्रम्।

**प्रस्तावना** :- भारतीयज्ञानपरम्परायां भारतीयदर्शनशास्त्राणां अतीव महत्वपूर्णं स्थानं विद्यते। तेषु कपिलाचार्यस्य प्राचीनतमदर्शनस्य सांख्यदर्शनस्य सर्वत्रमेव लोकप्रियत्वम् अनुभूयते। द्वैतमतप्रतिपादकं दर्शनोऽयं सर्वेषां भारतीयदर्शनानां आधारशिलाऽस्ति तथा च एकात्मवादसय अद्वैतवादसिद्धान्तस्य सुरम्यभूमिः अस्ति । भारतीयज्ञान-विज्ञान-संस्कृति-सभ्यतायाः आधारभूतं दर्शनमस्ति सांख्यदर्शनम्। प्रायः सर्वेषां दर्शनशास्त्राणां तत्तनिरूपणे सांख्यसिद्धान्तस्य उपयोग: दृश्यते। दर्शनस्यास्य प्रवर्तकाचार्यः अस्ति सिद्धपुरुषः भगवान् कपिलाचार्य:। सांख्यदर्शनस्य प्राचीनत्वविषये नास्ति कोऽपि संशय:। भगवान् शङ्कराचार्य: स्वरचिते शारीरभाष्ये प्रधानमल्लरूपेण सांख्यदर्शनं निर्दिष्टवान्। कुर्मपुराणेऽपि अयं दर्शनं स्वयं वेदरूपेण मोक्षदर्शनरूपेण च उद्घोषणं दृश्यते-

**वदन्ति कारणैर्वेदं सांख्यं सम्यग्विदजातयः। एतदाहुर्महाप्राज्ञा: सांख्यं वै मोक्षदर्शनम्।**

सांख्यज्ञानस्य श्रेष्ठत्वं तथा च योगवलस्य महत्वं महाभारते आचार्येण व्यासेन प्रतिपादितम्-

**नास्ति सांख्यसमं ज्ञानं नास्ति योगमतं बलम्। अत्र व: संशयो मा भूत् ज्ञानं सांख्यं परं स्मृतम्।।**[1]

अस्य शास्त्रस्य महत्वं सर्वत्र विदितम्। महाभारते भगवता व्यासदेवेन उक्तम्-

**ज्ञानं महद्यद्विमत्सु राजन्। वेदेषु सांख्येषु योगे। यच्चापि वृष्टिं विविधं पुराणे। सांख्यागतं तन्निखिलं नरेन्द्रः।**[2]

वस्तुतः महाभारतस्य दार्शनिकचिन्तनस्य पृष्टभूमिः अस्ति सांख्यदर्शनम् । शान्तिपर्वणि यत्र कुत्रापि पञ्चशिखेन सह तस्य शिष्यस्य धर्मध्वजजनकस्य संवादमाध्यमेन, ब्रह्मवादिनीसुलभ्या सह जनकस्य संवादमाध्यमेन, वसिष्टकराल-जनकसंवादमाध्यमेन तथा च याज्ञवल्क्य-देवरातिजनकयो: मध्ये संवादमाध्यमेन सांख्यदर्शनस्य सिद्धान्तानां सुन्दरतया सरलरीत्या वहु मनोरमं प्रतिपादनं परिलक्ष्यते। महाभारतं विनाऽपि श्रुतिः, स्मृतिः, पुराणं प्रभृतय: शास्त्रे सांख्यसिद्धान्तस्य प्रतिपादनं दर्शनस्यास्य व्यापकता लोकप्रियता च सिद्ध्यति तथा च मनुस्मृतिः, रामायणादि धर्मशास्त्रेऽपि सांख्यसिद्धान्तं विचार्यते एतद् वयं द्रष्टुं शक्नुमः । अतः इदं वक्तुं शक्यते यत् सांख्यसिद्धान्तं ऋक्वेदात् आरभ्य काव्यजगत्पर्यन्तं सर्वेषु स्थानेषु व्याप्तं स्यात्। अंतः सांख्यदर्शनस्य महत्वप्रतिपादनार्थं महाभारते भगवता व्यासेन कथितम्- **सांख्यं विशालं परमं पुराणं महार्णवं विमलमुदारकान्तम्।**

**कृत्स्नं च साख्यं नृपते महात्मा नारायणो धारयतेऽप्रमेयम्।**[3]

अपि च सांख्यदर्शनं पवित्ररूपेण स्वीकृत्य तस्य पवित्रताविषये श्रीमद् भगवतगीतायां भगवता श्रीकृष्णेन उक्तम् –

**न हि ज्ञानेन सदृशं पवित्रमिह विद्यते। तत् स्वयं योगसंसिद्ध: कालेनात्मनि विन्दते।**[4]

भारतवर्षस्य सुप्रसिद्धेषु दर्शनशास्त्रेषु महोदधिककल्पमेकं दुरवगाहं शास्त्रं हि सांख्यशास्त्रम् । तत्र प्रवेशाय सम्यगरूपेण तत्वज्ञानार्थं च गीतायां पुराणे च निरुपितस्य सांख्यतत्वस्य ज्ञानम् आवश्यकमस्ति। अध: श्रीमद्भगवद्गीतायां पुराणे च प्रतिपादितं सांख्यसिद्धान्तं उपस्थाप्यते :-

**पुराणसाहित्ये सांख्यंतत्वविचार: :-** महर्षिकपिलस्य सांख्यसिद्धान्तस्य वर्णना पुराणसाहित्ये उपलब्ध्यते। सर्वेषु पुराणग्रन्भेषु सृष्टि-उत्पत्तिप्रक्रियायाः वर्णना प्राप्यते। एषा प्रकृतिः अक्षय: ध्रुवः,शब्दस्पर्शरहिता तथा च सर्वेषां सृष्टपदार्थानां उत्पत्तेः मूलकारणं अस्ति। प्राय: सर्वेषु पुराणेषु विशेषत: अग्निः, कुर्मः, गरुड़:, स्कन्दः, पद्म, ब्रह्म:, विष्णुः भागवत्, ब्रह्मवैवर्त: च पुराणं विशिष्टतया सांख्यशास्त्रस्य तत्वं आलोचितम्। ब्रह्मवैवर्तपुराणे नित्यप्रकृत्या: कथं महत् अहंकार: आदय: तत्वानां वर्णना उपस्थाप्यते-

**यथैव प्रकृतिर्नित्या महानेव तथैव च। यथा दिशो महाकाशो यथैव सृष्टिगोलकम् ॥**
**प्रकृतेर्महतश्च स्यादहङ्कारस्तथैव च ॥**[5]

भागवत्पुराणस्य तृतीयस्कन्धस्य षड्विशतिः अध्याये प्रकृतिः त्रिगुणमयी, नित्या, अव्यक्तः, कार्यकारणरुपा च इति विशेषणेन अभिधीयते। तत्र आलोच्यते- **य इदं श्रुणुयादम्ब श्रद्धया पुरुषः सकृत् । यो वाभिधत्ते मच्चित्त: स ह्येति पदवीं च मे।**[6]
विष्णुपुराणं प्रधानं पुरुषं च भगवतः विष्णो: अवताररूपेण कल्पना क्रियते- **तदेव सवेमेवैतद्व्यक्ताव्यक्तस्वरुपवत्। तथापुरुषरूपेण कालरूपेण च स्थितम्।।**[7] अत्र व्यक्त-अव्यक्-ज्ञ इति तत्वानां स्वरुपप्रतिपादनाद् अनन्तरं सृष्टिप्रक्रिया अपि वर्णितम्। तत्र द्वितीयाध्याये जगत: मूलकारणत्वेन अतिसूक्ष्मं प्रकृतिं स्वीक्रियते। कुर्मपुराणे समुद्रमन्थनावसरे प्रादुभूता लक्ष्मी प्रकृतिरुपेण वर्णिता। तत्र जगत्कारणं प्रधानं प्रकृति: अव्यक्त: वा सदासदत्मकत्वेन विश्लेषितम्। अत्र सांख्यसंम्मतं सर्वेषां व्यक्ततत्वानां उत्तपत्ति: वर्णितम्। कुर्मपुराणे गुणत्रयाणां अन्योऽन्यमिधुनवृत्तित्वं स्पष्टतया आलोच्यते। ब्रह्मवैवर्तपुराणे संसारस्य कर्तारूपेण गुणत्रयम् उल्लिखितम्- **भवकारणरुपाश्च मूर्तिमन्तस्त्रयो गुणा:**।[8] अस्य पुराणस्य द्वितीय भागस्य नाम अस्ति प्रकृतिखण्डम्। अस्मिन् भागे प्रकृतिं सृष्टे: आदिकारणरूपेण मान्यताप्रदानं दृश्यते तथा च तत्र विशिष्टतया प्रकृते: निर्वचनं दृश्यते। तत्र प्र, कृ तथा च ति इति अक्षयत्रयं क्रमश: सत्व- रज-तमसगुणस्य द्योतकरूपेण वर्णितम्-

**प्रकृष्टवाचक: प्रश्च कृतिश्च सृष्टिवाचकः। सृष्टौ प्रकृष्टा या देवी प्रकृतिः सा प्रकीर्तिता ।।**
**गुणे प्रकृष्टसत्वे च प्रशब्दो वर्तते श्रुतौ। मध्यमे रजसि कृश्च निशब्दस्तमसि स्मृत: ॥**
**त्रिगुणात्मस्वरुपा या सर्वशक्तिसमन्विता । प्रधानसृष्टिकरणे प्रकृतिस्तेन कथ्यते।।**[9]

गरुडपुराणे अपि सांख्यतत्वस्य वर्णना २२७ अध्यायतः २२९ अध्यायपर्यन्तं परिलक्ष्यते। तत्र प्रकृतेः चर्चा "**साम्यावस्था गुणकृता प्रकृति**" इति वचनेन आलोचनं दृष्टम्। अग्निपुराणे सांख्यस्य पञ्चविंशतितत्वै: सह सुक्ष्मशरीरस्य उल्लेखं प्राप्यते। पद्मपुराणस्य आदिखण्डे सांख्यानुरूपा सृष्टिप्रक्रिया वर्णिताऽस्ति। ब्रह्मवैवर्तपुराणे कपिलमुनेः इदृशी प्रशंसा आलोचिता - **शास्त्राणाञ्च यथा वेदा: सिद्धान्तानां कपिलो यथा।**[10] ब्रह्मपुराणं २३८ अध्यायत: २३९ अध्याये कपिलमुने: कपिलसांख्यश्च प्रशंसावाणीं श्रावयति- **सांख्या: शास्त्रविनिश्चयाः। मार्गज्ञा: कपिला: सांख्याः।**[11] श्रीमद्भागवत्महापुराणेऽपि कपिलमुने: जन्मः, देवहूति-कपिलसंवाद: ,कपिलेन भक्तियोगस्य निरुपणञ्च आलोच्यते। तत्र परिलक्ष्यते-**कपिलस्तत्वसंख्याता भगवानात्ममायया जात: स्वयमज: साक्षादात्मप्रज्ञप्तये नृणाम्।**[12] अस्मिन् महापुराणस्य षड्विंशतिः अध्याये महदादिक्रमे तत्वस्य उत्पत्ति: तथा च सप्तविंशतिः अध्याये प्रकृतिपुरुषविवेकेन मोक्षप्राप्तिविषये वर्णनाऽपि प्राप्यते। पुरुषस्य स्वरुपप्रसङ्गे श्रीमद्भागवत्महापुराणे उपस्थाप्यते - **अनादिरात्मा पुरुषो निर्गुण: परः।** श्रीमद्भागवत्पुराणे प्रकृति: अनेन उपस्थापितम्- **गुणैर्विचित्राः सृजतीं सरुपा: प्रकृतिं प्रजा।**[13]

मत्स्यपुराणस्य तृतीयोऽध्याये सांख्यानुसारं सृष्टिविषयमधीकृत्य सविशदं निरूपणं दृश्यते । तत्र सांख्यप्रणेता कपिलस्य नामोल्लेखमपि प्राप्यते तथा च महत्तत्वे विद्यमानगुणत्रयाणां उलेखमपि प्राप्यते। तत्र सत्वरजतमगुणेन सह ब्रह्मा-विष्णु-शिवस्य तादात्म्यसम्बन्धः विचार्यते। पद्मपुराणस्य आदिखण्डे, अग्निपुराणे, मत्स्यपुराणे च साख्यसदृश: सर्गोत्पत्ति: वर्ण्यते। वायुपुराणस्य सृष्टिप्रकरणे तथा च स्कन्दपुराणस्य माहेश्वरखण्डानन्तर्गतं कौमारिकाखण्डे प्रकृतिपुरुषयो: उल्लेखं प्राप्यते। देवीभागवत्पुराणे **"सांख्या वदन्ति पुरुष: प्रकृतिं च यां नां चैतन्यभावरहितां जगतश्च कर्त्रीम्"**[14] इति वचनेन प्रकृतिं अचेतनं तथा च जगतकर्त्रीरुपेण आलेच्यते। देवीभागवतपुराणे सांख्यदर्शनं परमज्ञानरूपेण तथा च अज्ञाननाशकरुपेण वर्णितम्।

पुराणे प्रतिपादितं सांख्यदर्शनं इश्वरवादी दर्शनमस्ति। प्रकृति-पुरुषयो: चर्चा येषु पुराणेषु आलोचीयते तेषां इश्वराश्रितत्वं सिद्धम् इति वक्तुं शक्यते। ब्रह्मपुराणे, वायुपुराणे, भागवत्पुराणे च इश्वरेण प्रेरितः प्रकृतिमाध्यमेन जगतोत्पत्तिसिद्धान्तं प्रतिपादितम्।

**भगवद्गीतायां सांख्यतत्वविचार**: :- श्रीमदभगवद्गीताऽस्ति सांख्यप्रतिपादिततत्वानां आकरग्रन्थः। श्रीगीता सांख्यसिद्धान्ते सुसमृद्धा विकसिता च वर्तते । अत्र सांख्यसिद्धान्तानां वर्णनं विपुलपरिमानेन प्राप्यते। स्वयं भगवान् श्रीकृष्णः गीतायाः प्रशंसा कृतवान्। गीतामाहात्म्यविषये आलोच्यते - **गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरै:। या स्वयं-पद्मनाभस्य मुखपदाद्विनिःसृता:** ॥[15]

भगवान् श्रीकृष्ण: गीतायाः विभूतियोगनामके दशमोऽध्याये सांख्यदर्शनस्य प्रवर्तकाचार्यरूपेण महर्षिकपिलस्य वर्णितवान् **- सिद्धानां कपिलो मुनिः।**[16] गीताया: सांख्ययोगनामके द्वितीयोऽध्याये भगवान् श्रीकृष्ण: अर्जुनं सांख्यसम्मतं ज्ञानं ददाति । स: अर्जुनं प्रति उक्तवान् – **एषा नेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु। बुद्ध्या युक्तो यया पार्थ कर्मवन्धं प्रहास्यसि।**[17]
सांख्यशब्दस्य प्रयोगः गीताया: वहु स्थाने उल्लिख्यते। गीतायां दृश्यते-

**एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु। लोकेस्मिन द्विविधा निष्ठा पुरा प्रोक्ता मयानघ।**
**ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्।**[18] **सांख्ययोगौ पृथग्वालाः प्रवदन्ति न पण्डिताः ।**
**एकमाप्यास्थितः सम्यगुभयोर्विन्दते फलम् ॥**[19]

श्रीगीता परमेश्वरं परमतत्वरूपेण स्वीक्रियते तथा च तत्र प्रकृतिं परमेश्वराधीनरूपेण उल्लिख्यते। प्रकृति-पुरुषयोः विवेकज्ञानेन अपवर्ग: मोक्ष: वा लभते एतदस्ति सांख्यस्य मोक्षस्वरूपम्। श्रीगीतायां भगवता श्रीकृष्णेन सांख्यसम्मतं मोक्षस्वरूपं निरूप्यते। गीतायां प्रतिपाद्यते- **यस्य नाहङ्कृतो भावो बुद्धिर्यस्य न लिप्यते। हत्वापि स इमाँल्लोकान् न हन्ति न निवध्यते ॥**[20]

गीताया: गुणत्रयविभागयोगनामके चतुर्दशोऽध्याये गुणत्रयाणां सविशदं विवरणं प्राप्यते। सांख्यदर्शने गुणत्रयं अस्ति- सत्व: रज: तमः च। तत्रोच्यते- **सत्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः। निबध्नन्ति महावाहो देहे देहिनमव्ययम् ॥**[21]
सत्वरजतमगुणानां फलविषये भगवता श्रीकृष्णेन अजुनं प्रति उक्तम्-

**कर्मणः सुकृतस्याहुः सात्विकं निर्मलं फलम्। रजसस्तु फलं दुखमज्ञानं तमसः फलम् ॥**
**सत्वात् सञ्जायते ज्ञानं रजसो लोभ एव च । प्रमादमोहौ तमसा भवतो ज्ञानमेव च**
**ऊर्ध्वं गच्छन्ति सत्वस्था मध्ये तिष्ठति राजसाः। जघन्यगुणवृत्तिस्था अधो गच्छति तमसाः ॥**[22]

गुणत्रयाणां स्वरूपम् अपि अत्र उल्लिख्यते- **सत्वं सुखे संजयति रजः कर्मणि भारत। ज्ञानमावृत्य तु तमः प्रमादे संजयत्युत।।**[23]
अत्र गुणात्रयाणां न्यूनाधिकभावमपि भगवताकण्ठेन व्यक्तम्- **रजस्तमश्चाभिभूय सत्वं भवति भारत। रजः सत्वं तमश्चैव तमः सत्वं रजस्तथा ॥**[24]

जन्ममरणस्पचक्रस्य विविधरूपं सांख्यानुसारेण प्रकृत्या: गुणत्रयाणां उत्कर्षापकर्षस्य कारणाद् एव भवति। यथा सत्वगुणस्य उ्तकर्षभावात् देवयोनि:, रजगुणस्य प्राधान्येन मनुष्ययोनि:, तथा च तमोगुणस्य आधिक्येन एव निर्यकयोनि: प्राप्यन्ते। गीतायां सत्वरजतमगुणस्य प्रवृत्तिविषये प्रतिपाद्यते-

**यजन्ते सात्विका देवान्याक्षरक्षांसि राजसाः। प्रेता-भूतगणाश्चान्ये यजन्ते तामसा जनाः ॥**[25]

गीतायां सांख्यविकासवादस्य सत्कार्यवादस्य च आलोचना दृश्यते। सत्कार्यवादानुसारेण सतः सत् जायते इति सिद्धान्तं स्वीकृतम्। श्रीमद्भागवद्गीतायां सत्कार्यवादविषये आलोच्यते-

**नासतो विद्यते भावो नाभावो विद्यते सतः। उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्वदर्शिभिः॥**[26]

सांख्यशब्दस्य अर्थः गीतायां ज्ञानमार्गरूपेण वर्णितः तथा च तत्र प्रकृति-पुरुष-व्यक्ततत्वानां चर्चा अपि दृश्यते। तत्र वर्णितम् यत् जगतः सृष्टिः क्षेत्रक्षेज्ञयो: संयोगेन भवति ; तथा च सर्वेषां विकाराणां आश्रयोऽस्ति प्रकृतिः। प्रकृत्याः एव व्यक्ततत्वानां उत्पत्तिः, अपि तु प्रकृत्यामेव तेषां तिरोभावो दृश्यते। गीतायां उच्यते-

**अव्यक्तागद्व्यक्तयः सर्वाः प्रभवन्त्यहरागमे।रात्र्यागमे प्रलीयन्ते तत्रैवाक्तसंज्ञके ॥**[27]

गीतायां पुरुषस्वरुपं वर्णितम् अनेन श्लोकेन-

**पुरुष स परः पार्थः भक्त्या लभ्यस्त्वनन्यया । यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततम् ।।**[28]

भगवद्गीतायां प्रकृतिः पुरुषः च तत्वद्वयं नित्यं, अनादि च । यद्यपि गीतायां सांख्यसदृश: पुरुष: स्वीकृतः परन्तु तत्र पुरुषवहुत्वं न स्वीकृतम्। अत्र पुरुष: भोक्ता, उपद्रष्टा, अनुमन्ता, महेश्वरः, परमात्मा, इति विशेषणेन भूषित:।

उपर्युक्तविवेचनानुसारं वक्तुं शक्यते यत् गीतासांख्ययोः सिद्धान्तं तत्वतः पूर्णतया अभिन्नं नास्ति। यद्यपि इदं वक्तुं शक्यते यत् गीतायां कपिलप्रवर्तितस्य सांख्यशास्त्रस्य विशिष्टतया महत्वप्रदानमभवत् परन्तु गीतायां पूर्णरुपेण सांख्यसिद्धान्तस्य समावेशः न अभवत्; बहुक्षेत्रे वैसादृश्यं परिलक्ष्यते। गीताशास्त्रे साख्यसदृश: प्रकृतिपुरुषः नाम्नः तत्वदयं न स्वीकृत्य पृथिवी-जल - अग्नि- वायु- आकाश-मन- बुद्धि- अहंकारभेदेन विभक्ता: पदार्थाः परमात्मन: प्रकृतिरूपेण स्वीकृतमासीत्। गीतायां प्राप्यते- **भूमिरापोऽनलो वायुः रवं मनो बुद्धिरेव च। अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा।**[29] अनेन श्रीमद्भगवद्गीतायां पुराणसाहित्ये च सांख्यतत्वविचार: प्रतिपादित: ।

**उपसंहार** :- भारतवर्षस्य अनुपमनिधिस्वरूपं हि दर्शनशास्त्रम्। तेषु कपिलाचार्यप्रणीतं सांख्यदर्शनं अतिप्राचीनतम् इति विद्वांसै: मन्यन्ते। दर्शनशास्त्रजगति सर्वप्रथमं तत्वगणनया: श्रेय: सांख्यदर्शनं लभते। कारणं तु अस्मिन दर्शने कपिलाचार्येण सर्वप्रथमं पञ्चविंशतितत्वानां गणनां कृतम्। पञ्चविंशतितत्वसम्वलितं दर्शनोऽयं भौतिकवादस्य गुरुत्वं प्रददाति। प्रकृति पुरुष: च तत्त्वद्वयं प्रधानतत्वरुपेण स्वीकृतत्वात् अयं दर्शनं द्वैतवादीदर्शनं इति नाम्ना अपि सुप्रसिद्धम्। अयं दर्शनं न केवलं ऐतिहासिकदृष्ट्या सुसमृद्धम्, अपि तु विचारदृष्ट्याऽपि सुविख्यातमस्ति। पुराणसाहित्यं श्रीमद्भगवतगीता च सांख्यसिद्धान्तानां निरुपणार्थं कोषागार: तुल्य। तत्र सांख्यसिद्धान्तं स्वस्य अपरिमितं साम्राज्यं विस्तारयति। भागवतपुराणे, मत्स्यपुराणे, ब्रह्मपुराणे च अयं विचारः प्राप्यते- पञ्चविंशतित्तत्वानां विचारः सांख्यम्, तमधिकृतो ग्रन्थः सांख्यमुच्यते। ब्रह्मवैवर्तपुराणे प्रकृत्याः त्रयोविंशतितत्वानां सृष्टिप्रक्रिया वर्णयते। भागवतपुराणेऽपि कैवत्यसाधनप्राप्ते: उपायरुपेण सांख्यदर्शनं उपस्थापितम्। विष्णुपुराणे प्रथमद्वितीयोऽध्यायानां १९- २३ श्लोकेषु प्रकृति- पुरुषयोः तथा च परमात्मनः वर्णनं प्राप्यते तथा च विष्णुपुराणे सृष्टिप्रक्रिया अपि वर्णितम्। अग्निपुराणे सांख्यनिर्देशितं पञ्चविंशतितत्वानां निरुपणमपि दृश्यते। ब्रह्मवैवर्तपुराणस्य ब्रह्मखण्डे संसारस्य गुणत्रयाणां स्वरूपं तथा च प्रकृतिखण्डे प्रकृतिस्वरूपं विशिष्टरीत्या वर्णनं परिलक्ष्यते। पुन: महाभारतस्य भीष्मपर्वन: अंशभूतश्रीमद्भगवद्गीतायां भगवान् श्रीकृष्णः कुरुक्षेत्र रणभूमौ अर्जुनस्य मोहदूरीकरणाय यत्र तत्र सांख्यतत्वानां सांख्यसिद्धान्तानां च उपदेशं अर्जुनं उपदिष्टवान्। श्रीमद्भगवद्गीतायां सत्वरजतमोगुणयुक्ताया: मूलप्रकृत्या: आविर्भूतत्रयोविंशतितत्त्वै: क्षेत्रस्य स्वरूपं वर्णितम् यत् सांख्यदर्शनाधारितमस्ति। तत्र जडतत्वं अस्ति क्षेत्रः तथा च चेतन: अस्ति क्षेत्रज्ञः। अनेन चेतनाचेतनतत्वद्वयं पृथकरूपेण स्वतन्त्ररूपेण मत्वा गीता सांख्यसिद्धान्तस्य अनुसरणं करोति एतद् वक्तुं शक्यते। अत: सांख्यत्तत्त्वविश्लेषणे, सांख्यसिद्धान्तं अवबोधाय च पुराणसाहित्यस्य श्रीमद्भगवद्गीतायाः ज्ञानलाभं अवश्यमेव करणीयम्।

**सन्दर्भग्रन्थसूची** –

1. श्रीमद्भगवद्गीता,गीताप्रेस,गोरक्षपुर-२७३००५।
2. पुराणविमर्श-उपाध्याय आचार्य वलदेव,चौखम्वा विद्याभवन,वाराणसी-२२१००१।
3. सांख्यदर्शन एवं अद्वैतवेदान्त,गुप्ता डः ममता,चौखम्वा कृष्णदास अकादमी,वाराणसी।

**तथ्यसूत्रम -**

1. महाभारतम, शान्तिपर्व-३१६।
2. महाभारतम, शान्तिपर्वः-१६८-३०।
3. महाभारतम, शान्तिपर्वः-३०१-११४।
4. श्रीमद्भगवद्गीता-३/३८।
5. ब्रह्मवैवर्तपुराणम्, श्रीकृष्णजन्मखण्डम्,१२६-८.९।
6. भागवत्पुराणम्-३/३२/४३।
7. विष्णुपुराणम्।
8. ब्रह्मवैवर्तपुराणम्,३/४।
9. ब्रह्मवैवर्तपुराणम्, प्रकृतिखण्डम्,१/४.५.६।
10. ब्रह्मवैवर्तपुराणम्, गणपतिखण्डम्,३/१३।
11. ब्रह्मवैवर्तपुराणम्,२३८/७. १३६-५१।
12. भागवत्पुराणम्-३/२५/१।
13. भागवत्पुराणम्-३/२६/५।
14. देवीभागवत्पुराणम्।
15. श्रीमद्भगवद्गीता,पृष्ठा-२६९।
16. श्रीमद्भगवद्गीता,१०/२६।
17. श्रीमद्भगवद्गीता,२/३९।
18. श्रीमद्भगवद्गीता-३/३।
19. श्रीमद्भगवद्गीता-५/४।
20. श्रीमद्भगवद्गीता-१८/१७।
21. श्रीमद्भगवद्गीता-१४/५।
22. श्रीमद्भगवद्गीता-१४-१६.१७,१८।
23. श्रीमद्भगवद्गीता-१४/६।
24. श्रीमद्भगवद्गीता-१४/९।
25. श्रीमद्भगवद्गीता--१४/४।
26. श्रीमद्भगवद्गीता-२/१६।
27. श्रीमद्भगवद्गीता-८/१८।
28. श्रीमद्भगवद्गीता-२/२२
29. श्रीमद्भगवद्गीता-७/४।

❖